www.thearyasamaj.org

दिसम्बर २०११ ईसवीयाब्दः ओ३म् R.N.I.Regd. No. UPBIL/1998/1485

ज्वालापुरीय - गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

# भारतोदयः

'भारते भातु भारती'

## * सैव सुधामयी संस्कृत-भारती *

-डॉ. अनन्तराममिश्रः 'अनन्तः'
गोला गोकर्णनाथ, खीरी-२७२८०२
(उत्तरप्रदेशः)

(१)

साधु-समूह-सामदृता सर्वदा,
भारत-राष्ट्र-विकास-विधायिनी।
शक्तिमतां वर - साधनतया,
बलितास्ति विवेकदचिन्तनदायिनी।।

(२)

या सुकुमार-पदान्वितमञ्जुला,
सत्कविमानसवारिजशायिनी।
सैव सुधामयी संस्कृत-भारती,
यच्छतु विस्तरतामनपायिनी।।

(३)

काव्य-कला कल-कारिका कोमला,
दीप्तिमती हृदयाम्बर-तारिका ।
विश्व - प्रपञ्च - प्रपीडितमानव-
मानसानां परिदेवनहारिका।।

(४)

कान्ति-प्रसारिका भ्रान्ति-निवारिका,
भूमि-तले सकले शुभ-कारिका।
अस्ति कुमारिकाकल्पशुचिव्रता,
संस्कृत-भारती जीवन-धारिका ।।

www.thearyasamaj.org

दूरभाषः - ०१३३४ २५४२९५ / २५५३७७ (ज्वालापुरम्)
तारगृहम् - महाविद्यालयः (ज्वालापुरम्)


# भारतोदयः

संस्कृत - मासिकपत्रम्

वर्षम् - १०२ अङ्कः - ६

सम्पादकः
**डॉ. हरिगोपालशास्त्री**
व्याकरणाचार्यः
एम.ए., पीएच. डी.
राष्ट्रपति-पुरस्कृतः

सह - सम्पादकः
**डॉ. केशवप्रसाद उपाध्यायः**
साहित्याचार्यः
एम.ए., पीएच. डी.

प्रबन्ध - सम्पादकः
**डॉ. अजयकौशिकः**
साहित्याचार्यः
एम.ए., पीएच. डी.

प्रकाशकः
गुरुकुलमहाविद्यालयः ज्वालापुरम्
हरिद्वारम् - २४९४०४
(उत्तराखण्ड-प्रदेशः)

**शुल्क - विवरणम्**

| | |
|---|---|
| प्रत्यङ्कम् | ५/- |
| वार्षिकम् | ५०/- |
| आजीवनम् | ५००/- |


# विषयानुक्रमणिका


| | | | |
|---|---|---|---|
| १. | श्रुतिसुधा | - महर्षिदयानन्दसरस्वती | ३ |
| २. | दयानन्दीया वैदिकशिक्षा-पद्धतिस्तन्महत्वञ्च | - डॉ. सत्यदेवः निगमालङ्कारः | ४ |
| ३. | जगद्गुरु दयानन्द | - श्री पतिराम शर्मा 'व्यथित' | ८ |
| ४. | उपासनायाः वैदिकं स्वरूपम् (१) | - डॉ. रजनी आत्रेयः | ९ |
| ५. | रसगङ्गाधरे समस्यापूर्तिः | - श्री अनन्त शास्त्री पिंगले | १३ |
| ६. | रामायणकाले विविधाः शिक्षाः | - डॉ. हरीशचन्द्रः गुरुरानी | १४ |
| ७. | एतावान् विलम्बः | - डॉ. प्रशस्यमित्रशास्त्री | १९ |
| ८. | साम्प्रतं तत्र साम्प्रतम् | - वैद्य रामस्वरूपशास्त्री | २० |



**राष्ट्रियसंस्कृतसंस्थानस्य अनुदान-साहाय्येन प्रकाशितम्**

**भारतोदयः (संस्कृत-मासिकम्)**

(RNI Regd. No. UPBIL/1998/1485)

| | |
|---|---|
| १. प्रकाशनस्थानम् | ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डम्) |
| २. प्रकाशनकालावधिः | मासिकम् |
| ३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य, सम्पादकस्य नाम, नागरिकता च | डा. हरिगोपालशास्त्री, भारतीयः, गुरुकुल महाविद्यालयः ज्वालापुरम् हरिद्वारम् -२४९४०४ (उत्तराखण्डम्) |
| ४. पत्राधिकारिणां नाम्ना सह सङ्केतः | ज्वालापुरीय-गुरुकुलमहाविद्यालय-सभा, ज्वालापुरम् हरिद्वारम्-२४९४०४ (उत्तराखण्डम्) |

डा. हरिगोपालशास्त्री इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति ।

-डा. हरिगोपालशास्त्री

www.thearyasamaj.org

ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

# भारतोदयः

भविक-भरित-भारतोदयोऽयं भव-विभवोद्भव-भावनाभिलाषी।
भगवति भुवि भक्ति-भावभाजां भव-भय-भाव-भरं भ्रियान्नभूमन्॥

x x x

निशाम्यतां लेख-ललाम-सञ्चय-प्रकाशने येन कृतोऽतिनिश्चयः।
गृहीतसद्धर्मविशेषसंश्रयश्चकास्ति सोऽयं भुवि 'भारतोदयः'॥

| वर्षम् - १०२ | पौष २०६८ विक्रमाब्दः * दिसम्बर २०११ ईसवीयाब्दः | अङ्कः - ६ |
|---|---|---|

## श्रुति-सुधा

**ओ३म् उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे ।**
**उप प्र यन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा ॥**

-ऋग्वेदः १/४०/१

**पदार्थः -**

(**उत्**) उत्कृष्टार्थे । (**तिष्ठ**) (**ब्रह्मणः**) वेदस्य । (**पते**) स्वामिन् । (**देवयन्तः**) सत्यविद्याः कामयमानाः । (**त्वा**) त्वाम् । (**ईमहे**) जानीम । (**उप**) सामीप्ये । (**प्र**) प्रतीतार्थे । (**यन्तु**) प्राप्नुवन्तु । (**मरुतः**) आर्त्विजीना विद्वांसः । (**सुदानवः**) शोभनं दानुर्दानं येषां ते । (**इन्द्र**) विद्यादिपरमैश्वर्यप्रद । (**प्राशूः**) यः प्राश्नुते प्रकृष्टतया व्याप्नोति सः । (**भव**) अत्र **द्व्यचोऽतस्तिङः** [अ. ६/३/१३४] इति दीर्घः । (**सचा**) समवेतेन विज्ञानेन ॥१॥ अत्र वाचक-लुप्तोपमालङ्कारः ।

**भावार्थः -**

**मनुष्यैर्यत्नतो विद्वत्सङ्गसेवाविद्यायोगधर्मसर्वोपकाराद्युपायैः सर्वविद्याधीशस्य परमेश्वरस्य विज्ञानेन प्राप्याणि सर्वाणि सुखानि प्राप्तव्यानि प्रापयितव्यानि च ॥१॥**

**-महर्षिदयानन्दसरस्वती**

[ ऋग्वेदभाष्यम्, द्वितीयो भागः, ३७६ पृष्ठे ]

www.thearyasamaj.org

# * दयानन्दीया वैदिकशिक्षापद्धतिस्तन्महत्त्वञ्च *

-डॉ. सत्यदेवनिगमालङ्कारः
अध्यक्षः, श्रद्धानन्दवैदिकशोधसंस्थानम्
गुरुकुलकांगड़ीविश्वविद्यालयः
हरिद्वारम् (उत्तराखण्डः)

महर्षिदयानन्दः यत्र स्वग्रन्थेषु समाज-व्यवस्थां, राजनीति-व्यवस्थां, धर्म-व्यवस्थां चावर्णयत्, तत्र सः समाजराजनीतिधर्माणां मूलकारणं शिक्षाव्यवस्थामपि स्पष्टरूपेण उपस्थापितवान् । स्वरचितेषु लघुषु दीर्घेषु च ग्रन्थेषु वेदभाष्येऽपि च सो वैदिको विद्वान् शिक्षायाः परिभाषाम् एवम् अलिखत् -

**'जिसमें मनुष्य विद्या आदि शुभ गुणों की प्राप्ति और अविद्यादि दोषों को छोड़ के सदा आनन्दित हो सके, वह शिक्षा कहाती है[१]।'**

**'शिक्षा जिससे विद्या, सभ्यता, धर्मात्मता, जितेन्द्रियतादि की बढ़ती होवे और अविद्यादि दोष छूटें, उसको शिक्षा कहते हैं[२]।'**

शिक्षासम्बन्धिता एव विद्याऽस्ति, तस्याः विषये महर्षिरुवाच-

**'अनित्य में अनित्य और नित्य में नित्य, अपवित्र में अपवित्र और पवित्र में पवित्र, दुःख में दुःख और सुख में सुख, अनात्मा में अनात्मा और आत्मा में आत्मा का ज्ञान होना विद्या है । अर्थात् वेत्ति यथावत् तत्त्वपदार्थ-स्वरूपं यया सा विद्या[३]।'**

**'जिससे ईश्वर से लेके पृथिवीपर्यन्त पदार्थों का सत्य विज्ञान होकर धन से यथायोग्य उपकार लेना होता है, इसका नाम विद्या है[३]।'**

**'जिससे ईश्वर से लेके पृथिवी पर्यन्त पदार्थों का सत्य विज्ञान होकर धन से यथायोग्य उपकार लेना होता है, इसका नाम विद्या है।[४]'**

व्यवहारभानु-ग्रन्थेऽपि सो द्विबारं विद्यायाः परिभाषामवर्णयत्[५] ।

शिक्षया एव मानवः सभ्यतां, सुशीलतां, व्यवहारम्, आहारं, ज्ञान-विज्ञानं, कर्माकर्म, धर्माधर्म, सत्यमसत्यं, विद्यामविद्यां च वेत्ति । अत एव महर्षिणा दयानन्देन शिक्षायाः महत्त्वमेवमुपस्थापितम्-

मननशीलाः स्त्रीपुरुषा जन्मारभ्य यावद् ब्रह्मचर्येण सकला विद्या गृह्णीयुस्तावत् सन्तानान् संशिक्ष्य यथायोग्येषु व्यवहारेषु सततं नियोजयेयुः[६] । हे स्त्रीपुरुषाः! यथाऽऽप्ता सर्वान् मनुष्यादीन् सत्यं बोधयन्तोऽसत्यान्निवारयन्तः सुशिक्षन्ते तथा स्वापत्यादीन् भवन्तः सततं सुशिक्षन्ताम् । यतो युष्माकं कुलेऽयोग्याः सन्तानाः कदाचित् न जायेरन्[७] । यथा सूर्योऽपां गर्भं जनयित्वा मेघेन सह

१. व्यवहारभानु ।
२. सत्यार्थ प्रकाश के अन्त में स्वमन्तव्यामन्तव्यप्रकाश संख्या २२१
३. सत्यार्थप्रकाश (नवम समुल्लास) ।
४. आर्योद्देश्यरत्नमाला ।
५. द्रष्टव्य, व्यवहारभानु (प्रकाशकः, वैदिक यन्त्रालयः) अजमेर (राजस्थान) ।
६. ऋग्वेदः १/११९/७ इत्यस्य मन्त्रस्य भावार्थः ।
७. ऋग्वेदः १/१२१/१ इत्यस्य मन्त्रस्य भावार्थः ।

www.thearyasamaj.org

संयोज्य वृष्टिं कृत्वा सर्वान् वर्धयति, तथाऽपत्यानां सुशिक्षका: सर्वत्र विजयिनो भवन्ति[८] । ये मनुष्या: स्वसन्तानान् युक्ताहारविहारेण सम्पाल्य सुशिक्षाविद्या-दानेन विदुष: कुर्वन्ति, ते सदैव विद्वत्सङ्गकामा धर्मेच्छा भूत्वा धीमन्तो भवन्ति । मनुष्यै: सदैव विद्या-युक्तां वाचं प्रज्ञां च प्राप्य सुशिक्षितान् सन्तानान् कृत्वाऽनादिभूतं सुखं प्राप्तव्यं सदैवाप्तानां प्रज्ञा सर्वज्ञ प्रसारणीयेति । मनुष्यै: परस्परान् प्रति शुभगुणग्रहण-दानोपदेश: कर्त्तव्य: । स्वसन्तानानां विद्यासुशिक्षा-विज्ञानानि सततं वर्द्धनीयानीति । ये मनुष्या अश्ववत् सन्तानान् विद्योपदेशाभ्यां प्रकाशयन्ति, ते प्रशंसिता भवन्ति । ये मनुष्या युक्ताहारविहारसुशिक्षाब्रह्मचर्य-विद्याभि: स्वसन्तानान् पुष्टियुक्तान् सत्यप्रशंसिन: पापात् पृथग्भूताँश्च कुर्वन्ति, प्राणवत् प्रजा आनन्दयन्ति च तेऽनन्तसुखा भवन्ति । यथा सुशिक्षातानां वाचो जलवत् कोमला जायन्ते, यथा ब्रह्मचारी वीर्यवान् भवति, तथाऽपत्यैर्विद्यासुशिक्षा: सङ्गृह्य बलवद्भि: सुशीलैर्भवितव्यम् । पित्र्यध्यापकोपदेशका: स्वयं धार्मिका विद्वांसो भूत्वा स्वसन्तानानपीदृशानेव योग्यान् धार्मिकान् विदुष: कुर्यु: । यथा सूर्यो मेघं भित्त्वा जलं जनयित्वा सर्वेषां सुखं सम्पादयति, तथाऽऽध्यापको जनको वा सर्वाभि: सुशिक्षाभि: सन्तानान् सुभूषितान् कृत्वा सततं सुखयेत्[९] । एवं प्रकारेण शिक्षयाऽनादिसुखप्राप्ति: जायते, प्रजा: सदाऽऽनन्दिता: भवन्ति । अन्यत्रापि शिक्षया लाभं स वर्णितवान्-

**'अविद्वान् लोग दूसरों को धर्म में निश्चय नहीं कर सकते और विद्वान् लोग धार्मिक होकर अनेक मनुष्यों को भी धार्मिक कर सकते हैं और कोई धूर्त मनुष्य अविद्वान् को बहका के अधर्म में प्रवृत्त कर सकता है परन्तु विद्वान् को अधर्म में कभी नहीं चला सकता । क्योंकि जैसे देखता हुआ मनुष्य कुएं में कभी नहीं गिरता, परन्तु अन्धे को तो गिरने का सम्भव है, वैसे विद्वान् सत्यासत्य को जानके उसमें निश्चल रह सकते और अविद्वान् ठीक-ठीक स्थिर नहीं रह सकते हैं[१०]।'**

स्वपत्रेषु विज्ञापनेषु चाऽपि महर्षिणा दयानन्देन विद्याया: महत्त्वम् एवं प्रकटितम्-

**'धर्म का रक्षक विद्या ही है, क्योंकि विद्या से ही धर्म और अधर्म का बोध होता है । उनमें सब मनुष्यों को हिताहित का बोध होता है, अन्यथा नहीं[११]।'**

विद्याया: लाभान् विज्ञापयन् महर्षिदयानन्द सरस्वती उवाच-

'ये मनुष्या: शुद्धान्त:करणेन प्राणोदानवत् सततं पुरुषार्थेन कमनीयां विद्यां गृह्णन्ति, ते विद्वदानन्दिता भवन्ति । हे विद्वांस:! यूयं सूर्यवत् प्रात: समयमारभ्य

---

८. ऋग्वेद: ३/१/१२ इत्यस्य मन्त्रस्य भावार्थ: ।

९. द्रष्टव्यम् क्रमश: ऋग्वेद: ३/३/७, ३/७/११, ३/२३/५, ४/१५/६, यजुर्वेद: ९/२९, ऋग्वेद: १/१८०/८, १/११६/८, ३/१/८, यजुर्वेद: १९/४०, ऋग्वेद: २/१७/६, इत्यस्य मन्त्रस्य भावार्थ:।

१०. व्यवहारभानु ।

११. ऋषि दयानन्द के पत्र और विज्ञापन (पृष्ठ २२)

www.thearyasamaj.org

प्रयत्नेन विद्याः प्रकाश्य सुखं लभध्वम् । सर्वैर्मनुष्यैः सर्वेभ्यो लाभेभ्यो विद्यालाभमुत्तमं मत्वा तत् प्राप्तव्यम्। यः विद्वत्सङ्गमनं कृत्वा सदैव कर्मानुष्ठानी जायते, स श्रेष्ठात्मबलो भवति । ये मनुष्या आत्मनाऽन्तःकरणेन च विद्यां प्राप्तुमिच्छन्ति, ते सर्वं सुखमश्नुवते[१२] ।

स्वग्रन्थे महर्षिदयानन्दः वर्णितवान् विद्या फलमेवानन्दप्रदमुल्लासदायकमुन्नतिकारकञ्च-

**'विद्या का सही फल है कि जो मनुष्य को धार्मिक होना अवश्य है । जिसने विद्या के प्रकाश से अच्छा जानकर न किया और बुरा जानकर न छोड़ा तो क्या वह चोर के समान नहीं है ? क्योंकि जैसे चोर भी चोरी को बुरा जानता हुआ करता है और साहूकारी को अच्छी जानके भी नहीं करता, वैसे ही जो पढ़के भी अधर्म को नहीं छोड़ता और धर्म को नहीं करनेहारा है[१३] ।'**

प्राचीनतमे ग्रन्थे ख्याता लोके सूक्तिरियं। यत् -

**'माता शत्रुः पिता वैरी, येन बालो न पाठितः।**
**न शोभते सभा-मध्ये हंस-मध्ये बको यथा ॥'**

महर्षिरपि स्वग्रन्थे एतादृशानि भाववचनान्येव प्रकटयामास-

**'वे माता पिता सन्तानों के पूर्ण वैरी हैं, जिन्होंने अपने सन्तानों को विद्या प्राप्त नहीं करायी[१४] ।'**

महर्षिदयानन्दः बालशिक्षायां मातुर्विशिष्टं महत्त्वमस्तीति मन्यते । स्ववेदभाष्यभावार्थे स स्थाने स्थाने प्रकटयति हृदयभावान्।

यान् सन्तानान् मातरः सुशिक्षया विद्यया प्रमाद-रहितान् कृत्वा वर्द्धयन्ति, ते सुखानि प्राप्य सर्वतो वर्द्धन्ते । यथा माता स्तन-पयसा सन्तानं पाति तथा विदुषी स्त्री सर्वं कुटुम्बं रक्षति । यथा सुभोजनेन शरीरं पुष्टं जायते, तथा मातुः सुशिक्षां प्राप्यात्मा पुष्टो जायते । यथा विदुषां शिक्षयोर्गुणज्ञानेन सुहितैर्मनुष्यैर्भूत्वाऽनेन पुरुषार्थसिद्धेः सर्वाणि सुखनिमित्तानि वस्तूनि जायन्ते तथा मातृशिक्षयैवापत्यान्युत्तमानि भवन्ति नान्यथा । यदि माता सूर्यवद् यानि स्वापत्यानि बोधयति, दुष्टाचारानपनीय शिक्षते तान्युत्तमानि भवन्ति । मातृभिः स्वसन्तानान् बाल्यावस्थायां सुशिक्ष्य विद्यया विदुषः सम्पाद्य तैः सहातुलं सुखं भोक्तव्यम् । माता स्वसन्तानान् शिक्षेत, यत इमे परस्परं प्रीता भवेयुर्वीराश्च । यत् कर्त्तव्यं तत् कुर्युरकर्त्तव्यं च नाचरेयुः[१५], बालशिक्षायां मातुर्वैशिष्ट्यमिदमेवास्ति यद् यदा माता बालं शिक्षयति, तदा बाल-हृदये सुखं जायते, कर्त्तव्याकर्त्तव्यं स वेत्ति, सरलताम् ऋजुताम्, उन्नतिपथम् अवजानाति । वस्तुतः पितुरपि तावदेव महत्त्वं भवति, बालशिक्षायां यावत् मातुः । अतः कतिपयेषु मन्त्रभावार्थेषु महर्षिणा दयानन्देन बालशिक्षायां मातापित्रोर्द्वयोरपि महत्त्वम् उपस्थापितम्-

ये पितरो यथा वत्समिव व्याधो मांसमिव वैद्यो

---

१२. क्रमशः, ऋग्वेदः ७/३३/११, ६/४७/५, ७/२/९
१३. व्यवहारभानु ।
१४. सत्यार्थप्रकाश (द्वितीय समुल्लास) ।
१५. क्रमशः, ऋग्वेदः २/११/८, १/१६४/४९, १/४८/१६, ४/१८/५, ६/६१/४, यजुर्वेद ११/६८ इत्यस्य भावार्थः ।

www.thearyasamaj.org

रोगिणो मलनिवारणमिव पुत्रान् दुर्गुणेभ्यो निवर्त्य शिक्षाविद्याप्तान् कुर्वन्ति, ते सन्तानसुखमश्नुवते । ये विद्वांसः पितरः स्वसन्तानान् ब्रह्मचर्यविद्या-विनयैर्विद्या-बलशुभगुणकर्माचरणान् कुर्वन्ति, तेऽत्यन्तं सुख-माप्नुवन्ति । ये माता-पितरः सत्योपदेशेन सूर्यवद्विद्या-प्रकाशयुक्ताः पृथिवी जलेन वृक्षानिव सन्तानान् शरीर-बलेन वर्द्धयन्ति, ते सर्वेषां रक्षां कर्त्तुमर्हन्ति।[१६]

त एव बालाः सुशिक्षिताः, मितभाषिणः, रोगरहिताः, सुखदायिनः, विद्वांसः, सुशीलाः, सूर्यवद्देशं कुलं च प्रकाशकाः, धर्माचरणशीलाः, पुरुषार्थिनः दुर्व्यसन-रहिताश्च भवन्ति, ये मातृपितृभ्यां शिक्षिताः सन्ति।

यौ मातापितरौ सुशीलौ धर्मात्मानौ श्रीमन्तौ कुलीनौ भवेतां ताभ्यां शिक्षित एव पुत्रो मितभाषी भूत्वा कीर्त्तिमाप्नोति । यस्य पृथिवीव माता द्यौरिव पिता भवेत्। स सर्वतः कुशली भूत्वा सर्वानरोगा-ञ्चतुरान् कुर्यात् । यदि मातापितरौ स्वपुत्रान् कन्याश्च ब्रह्मचर्येण वेद-विद्यया सुशिक्षया च युक्तान् कृत्वा शरीरात्मबलवतः कुर्यातां तर्हि तेभ्योऽत्यन्तसुखकरौ स्याताम् । विदुषां विदुषीणां चेदमेव मुख्यं कृत्यमस्ति यत् पुत्राः पुत्र्यश्च ब्रह्मचर्य-सुशिक्षाभ्यां विद्वांसो विदुष्यश्च सुशीलाः सततं सम्पादनीया इति । यदा माता-पितरः स्वपुत्रान् कन्याश्च सुशिक्ष्य पुनर्विदुषो विदुष्याश्च समीपे चिरं संस्थाप्याध्यापयेयुस्तदा ताः सूर्य इव कुलदेशोद्दीपकाः स्युः[१७] ।

संसारे एकं जन्म माता-पितृभ्यां जायते, द्वितीयञ्च विद्यया भवति । विद्या-जन्म एव संसारे महत्त्वपूर्णं फलदायकं यशोदायकं कल्याणकारकं च भवति । महर्षिदयानन्दः अत्राह-

ये मनुष्याणां विद्या-जन्म जानन्ति, ते मनुष्येषु पूर्णं शरीरात्मबलं प्राप्य सर्वान् पदार्थान् वेत्तुमर्हन्ति। ये कर्मोपासना-ज्ञानानि प्राप्नुवन्ति, ते स्वामिनो भवन्ति। यस्य मनुष्यस्य मातुः पितुरादिमं जन्म द्वितीयमाचार्याद् विद्यायाः सकाशाज्जन्म भवति, स एवाऽऽकाशस्थ-पदार्थानां वेत्ता प्रादुर्भूतः पूर्णो विद्वानतुलसुखप्रदो भवति । यथा स्त्रीपुरुषाभ्यामपत्यं जायते, तथाऽध्यापकोपदेशकाध्ययनोपदेशैर्विद्वांसो जायन्ते । ये द्वितीये विद्या-जन्मनि प्राप्तविद्या-यौवना भवन्ति, ते विद्वांसो भूत्वा विद्वत्सु मैत्रीमाचरन्तो विदुषां कल्याणाय प्रयतन्ते । विदुषामयं सिद्धान्तोऽस्ति योऽयं द्वाभ्यां जायते, यस्य द्वे मातरौ द्वौ च पितरौ वर्त्तेते, स कस्य पुत्र इति वयं न विजानीमः । अत्रायं सिद्धान्तो यथोत्पादकयोः पुत्रोऽस्ति तथाऽऽचार्य-विद्ययोरपि द्विजो वर्त्तते इति सर्वे विजानन्तु। ये मनुष्या माता-पितृभ्यां जन्म प्राप्याऽष्टमं वर्षमारभ्याऽऽचार्याद् विद्या-ग्रहणेन द्वितीयं जन्म प्राप्नुवन्ति, ये स्तुत्याः सन्तो धर्मार्थ-काम-मोक्षान् सार्द्धं शक्नुवन्ति । यदि मनुष्या द्वितीयं विद्या-जन्म प्राप्नुयुस्तर्हि तेषाममोघानि कर्माणि भवन्तीति वेद्यम्।

---

१६. क्रमशः, ऋग्वेदः १/१६१/१०, ४/३३/४, १/१८५/६, ११

१७. क्रमशः, यजुर्वेदः २३/२५, २५/१७, ३३/७७, १९/३९, ११/३६/११

www.thearyasamaj.org

यस्य विद्यासुशिक्षायुक्तयोर्मातापित्रोः सकाशादेकं जन्माऽऽचार्यविद्याभ्यां द्वितीयं च स द्विजः सन् विद्वान् स्यात्[१८] ।

एवं प्रकारेण ज्ञायते यद् महर्षिः दयानन्दः स्वग्रन्थेषु शिक्षायाः महत्त्वं स्थाने-स्थाने विनिर्दिशति। हुड़दंग-सज्जनयोश्च संवाद-प्रसङ्गे यदा हुड़दङ्गः कथयति-

**'पठितव्यं तदपि मर्तव्यं न पठितव्यं तदपि मर्तव्यम्।**
**दन्तकटाकटेति किं कर्त्तव्यम् ?'**

इति तदा सज्जन उत्तरयति-

**'न विद्यया विना सौख्यं नराणां जायते ध्रुवम् ।**
**अतो धर्मार्थमोक्षेभ्यो विद्याभ्यासं समाचरेत्[१९] ॥'**

महर्षिणा दयानन्देन शिक्षा-पद्धतौ मातुः पितुः आचार्यस्य उपदेशकस्य च महत्त्वपूर्णं स्थानम् उपस्थापितम् । शिक्षावताम् एतद् महत्त्वं यद् तेभ्यो दुष्टाः पाखण्डिनः बिभ्यति-

**यथा सिंहं दृष्ट्वा मृगादयः पलायन्ते, तथैव सुशिक्षिता विदुषीः प्रजाः समीक्ष्य पाखण्डिनो विलीयन्ते[२०] ।**

अन्ते च शिक्षायाः महत्त्वं विनिदर्शयन् महर्षिः दयानन्दः सरस्वती प्रोवाच-

**'यदि मनुष्येषु यथावत् सुशिक्षा भवेत्, तर्हि कनिष्ठमध्यमोत्तमा जना विवेकिनो भूत्वा यथावज्जगदुन्नतिं कर्तुं शक्नुयुः[२१] ।'**

इति दिक्।

*

१८. क्रमशः, ऋग्वेदः ६/५१/२, ७/३३/१०, १२/१३, ४/३४/२, ६/९/२, ७/४/५, १/१४९/५, ११
१९. व्यवहारभानु ।
२०. ऋग्वेदः ३/९/४, ११
२१. ऋग्वेदः ५/५९/७, ११

# *जगद् गुरु दयानन्द*

- श्री पतिराम शर्मा 'व्यथित'
चाँद का पुरा, अम्बाह (म.प्र.)

(१)

शब्द नहीं मेरे पास सारे गुण गाइ सकौं ,
कागज है थौरो धरा लोगनि से भरी है ।
सागर में डारौं मसी जल-तन्तु रहें कहां ?
कल्पना विशाल लघु मुख में न चरी है ॥
दया रूप धारि दया पूर्ण करी भारत पै ,
क्रूर के लिए भी दया दयानन्द करी है ।
धर्म धन खोते पड़े सोते हम आलस में ,
जग को जगाया निशा 'व्यथित' की हरी हैं ॥

(२)

आज जो भी जलवे दिखाते यहाँ पर कुछ ,
निज तन्त्र शीतल तरंग तरुणाई में ।
उसी ब्रह्मचारी की तपस्या का है परिणाम ,
तम त्यागि तेज आया स्वीय अरुणाई में ॥
सारे भ्रम दोष वेद भाष्य के हटाई दिये ,
सिन्धु में गभीर गुणधारा निपुणाई में ।
जगत् गुरु हैं ऋषि, उसका ऋणी है जग ,
लघु मति लेखनी 'व्यथित' कृपणाई में ॥

www.thearyasamaj.org

# * उपासनायाः वैदिकं स्वरूपम् ( १ ) *

-डॉ. रजनी आत्रेयः
ग्राम जगजीतपुरम्, पोस्ट कनखलः
हरिद्वारम्-२४९४०८ (उत्तराखण्डः)

उपासना-शब्दस्य शाब्दिकोऽर्थोऽस्ति समीपेऽवस्थानम्, उप = समीपे, आसना = अवस्थानम् । परमात्मनः समीपेऽवस्थितिरिति यावत् । 'उप' इति उपसर्ग - पूर्वकात् आस् - धातोः युचि टाप् निष्पद्यतेऽयम् उपासना-शब्दः । तस्य चैवमर्थो निर्गलितो भवति यत् शास्त्र-प्रतिपादितस्येष्टस्वरूपस्य मनसोपलम्भेन अन्यप्रत्यय-व्यवधान-राहित्येन लौकिकात्माभिमानवत् तस्येष्टस्य स्वरूपे आत्मतत्त्वाभिमान-जननं यावत् निरन्तरं चिन्तनम् । यथा -

१. उपासनं नाम उपास्यार्थवादे यथा देवतादि-स्वरूपं श्रुत्या ज्ञाप्यते तथा मनसोपगम्य आसनं चिन्तनं लौकिक-प्रत्ययाव्यवधानेन यावत्तद्देवतादि - स्वरूपात्माभिमानाभि - व्यक्तिरिति लौकिकात्माभिमानवत्[१] ।

२. श्रीमद् महर्षिदयानन्दोऽपि 'ऋग्वेदादिभाष्य-भूमिका'-नामके पुस्तके उपासना-विषये वर्णयति-

**'यः सूर्यादिलोकादिनामपि प्रकाशकः, सः ईश्वरो मनुष्यैरुपास्यः देवः नान्यः कश्चन[२] ।'**

अथ च -

**'केवलः परमेश्वरः एवोपासनायां ज्ञान-काण्डे च सर्वेषामिष्टः स्तुति-प्रार्थना-पूजोपासनायोग्यश्च[३]।'**

महर्षिदयानन्दस्य निर्दिष्टः साधना - पद्धतेः आधार-तत्त्वः **ईश्वर** एवास्ति । अयं **'ईश्वर-तत्त्वं** सर्वशक्तिमान् तत्त्वमस्ति, स यत्रापि साधनायाः निर्देशः करोति, तत्र ईश्वरः सर्वत्र उपस्थितं भवति ।

योगाभ्यास-कृते **'ईश्वरः'** अभिन्नतत्त्वमस्ति । साधकस्य सम्पूर्णसमर्पणमात्रैव तस्मै भवितुमर्हति । सैव परमात्मा साधकं लौकिक-सुखाद् मोक्ष-सुखमपि प्रददाति । ये जनाः स्वकीयानि सर्वाणि सम्भाराणि परमात्मनः कृते समर्पयन्ति, तेभ्यः परमकारुणिक-परमात्मा सर्वाणि सुखानि वितरति, नास्ति सन्देहावसरोऽत्र। अर्थात् परमात्मनः कृपायाः रश्मयः,उर्मयश्च परमप्रकाशस्वरूपविज्ञान-प्राप्तौ शुद्धं भूत्वा परमानन्दस्वरूपमोक्षसुखं यावज्जीवनं प्राप्नुवन्ति । ऋग्वेदादिभाष्यभूमिकाया[४] 'ईश्वर-स्तुतिः, प्रार्थना, याचना, समर्पण-विषयाणां च 'उपासना-विषयस्य' अध्ययनोपरान्तं तथ्योऽयं स्पष्ट-रूपेण समक्षम् आयाति यत् महर्षिदयानन्द-पद्धतेः साधकः सम्पूर्ण-साधनायाम् ईश्वरं पृथक् कर्तुं न शक्नोति । स स्वकीया प्रत्येका क्रिया तज्जन्यं फलं च अनिवार्यत्वेन ईश्वरं प्रति स्थापयेत् । कदाचित् तस्य पश्चात् महर्षेः दयानन्दस्य सिद्धान्तोऽयं सक्रियं भवेत् यत्

---

१. बृहदारण्यकोपनिषद् (शाङ्करभाष्यम्) १/३/९
२. ऋग्वेदादिभाष्यभूमिकायां ६५-६६ पृष्ठे
३. ऋग्वेदादिभाष्यभूमिकायां १७९ पृष्ठे
४. ऋग्वेदभाष्यभूमिकायां १७९ पृष्ठे

www.thearyasamaj.org

अनेन साधकस्य अन्त:करणे अहंकारस्य भाव: कदापि नागच्छेत्, यतो हि अहंकार: साधनायां सर्वाधिक-बाधकोऽस्ति। अस्य अहङ्कारस्य परिशमनं स्वोत्कृष्ट-जन-समक्षं कदाचित् ऋजु: भवेत्। साधना-काले साधकस्य प्रत्युपलब्धि:, साधकस्य प्रत्येक-भागस्तु भगवद् प्रसाद-स्वरूपोऽस्ति। आत्मानं किञ्चिदपि नास्ति, यस्मिन् अहं भाव: न्यास: क्रियेत्। अत्र साधक: सर्वदा ईश्वर-स्तुति-प्रार्थनायां च निरतोऽस्ति, तस्य एकमात्र आधार: सैवास्ति। ईश्वर-स्तुति: अर्थात् गुण-कीर्तनं, श्रवण-मनन-ज्ञानानुभावश्च[५]। प्रार्थना अर्थात् निरभिमानता, उत्साह-सहायश्च मिलनम्[६]। तथा उपासना परब्रह्मणा सह मिलनं तथा तस्य साक्षात्कार:[७]। योग-कर्त्तार: मनुष्या: तत्त्वं अर्थात् ब्रह्म-ज्ञानार्थं यदा सर्वात्मानं पूर्वं परमेश्वरे योजयन्ति। तदा परमेश्वर: तस्य बुद्धिं स्वकृपया आत्मनि योजयति, ते परमेश्वरस्य प्रकाशं निश्चित-रूपत्वेन यथावत् धारयन्ति[८]। एकस्मिन् अन्यभाष्यखण्डे साधकान् सम्बोधयति यत् -

'हे योगिन: उपासका: ! त्वं योगाभ्यासस्य परमात्मनश्च योगेन नाडीषु ध्यानं विधाय परमानन्दं विस्तारयतु।'

अनेन विधिना योनिम् अर्थात् स्वान्त:करणं शुद्धपरमानन्दस्वरूप-परमेश्वरे स्थिरं कृत्वा तस्मिन् उपासना-विधानेन विज्ञान-रूप-बीजं सम्यक् विधिना वपतु[९]। भाष्य-खण्ड: तम् उपासना-योग्य-विषयमपि स्पष्टं करोति यत् सा उपासना-योग-वृत्ति: सर्वेषां क्लेशानां विनाशिका सर्वशान्तादिगुण-सम्पन्ना चास्ति[१०]।

ऋषिदयानन्दभाष्ये अनेकत्र प्रभुभक्तिविषयकानि अवतरणानि प्राप्यन्ते[११]। सम्पूर्ण-ज्ञानस्य गतकार्यता प्रभुस्वरूप-प्रतिपादने वर्तते। महर्षि-पतञ्जले: योग-शास्त्र: यं तत्त्वं साधना-साधन-रूपे ग्राहक: प्रतीयते[१२]। स्वामी- दयानन्दस्य भाष्य: तं तत्त्वं साधनाया: सर्वमहत्त्वपूर्णम् अनिवार्यतत्त्वं च निरूपयति। महर्षि-पतञ्जले: वृत्ति-निरोधक-प्रतिपादक-सूत्रे पठित: 'द्रष्टु:'[१३] पदस्यार्थ:, यस्मिन् विषये भाष्यकार-व्यासोऽपि अतिस्पष्ट-वर्णनं न कृतवान्, महर्षिदयानन्द: स्पष्टतया 'परमात्मन:' ग्रहणं कृतवान्। यथा जल - प्रवाहं एकत: दृढ-बन्धन-माध्यमेन अवरुध्यते, तदा तज्जलं यं प्रति अधोभागं प्राप्यते, तं प्रति प्रवहति[१४]। महर्षि-दयानन्दस्य दृष्टौ योग-साधनाया: पक्षोऽपि तस्य प्रभो: आनन्दस्य प्राप्तिरस्ति। एवं दयानन्दोपदिष्टा सम्पूर्णा साधना-प्रक्रिया प्रभु-चिन्तनस्य परिधौ एव विचरति। प्रभो: विस्मरणं कृत्वा साधनाया: गतिशीलता अवरुद्धा भवति।

महर्षि-दयानन्दस्य वैदिकं मतमिदं यन्मनुष्येण परमेश्वरस्य स्तुति - प्रार्थनोपासना: अवश्यमेव कर्त्तव्या:। तासां फलं दु:ख-हानि: सुख-लाभश्च जायते। अतोऽत्र स्तुति-प्रार्थनोपासनां, लक्षणं फलं सिद्धिश्च प्रतिपाद्यते।

---

५. **सत्यार्थप्रकाश**: (स्वमन्तव्यामन्तव्यप्रकाश:) ९५८ पृष्ठे
६. सत्यार्थप्रकाशे (सप्तम-समुल्लासे) २८२ पृष्ठे
७. सत्यार्थप्रकाशे (सप्तम-समुल्लासे) २८२ पृष्ठे
८. ऋग्वेदादि-भाष्यभूमिकायां १८३ पृष्ठे
९. ऋग्वेदादि-भाष्यभूमिकायां १८५ पृष्ठे
१०. ऋग्वेदादि-भाष्यभूमिकायां १८५ पृष्ठे
११. द्रष्टव्यम्, संस्कारविधि: ईश्वरस्तुतिप्रार्थनोपासना-मन्त्राणामर्थ:, यजुर्वेदभाष्यम् २३/३, ३२/६
१२. योग-सूत्राणि १/२३, ईश्वर-प्रणिधानाद् वा
१३. योग-सूत्राणि १/३, यदा द्रष्टु: स्वरूपाऽवस्थानम्।
१४. ऋग्वेदादिभाष्यभूमिकायां १३९ पृष्ठे

www.thearyasamaj.org

## (१) स्तुतिः

(क) ईश्वरस्य गुणानां कीर्तनं श्रवणं ज्ञानं च स्तुतिरिति कथ्यते। अस्याः फलं प्रीत्यादयो भवन्ति।

(ख) यत्परमेश्वरस्य कस्यचिदन्यस्य पदार्थस्य वापगुणानां ज्ञानं कथनं श्रवणं सत्यभाषणं चास्ति, सा स्तुतिरिति कथ्यते।

(ग) या गुण-ज्ञानेन तेषु गुणवत्सु पदार्थेषु प्रीतिर्भवति, सा स्तुतिफलमभिधीयते।

(घ) ये गुणाः परमेश्वरे सन्ति, तैर्युक्तं परमेश्वरं मत्वा तस्य प्रशंसा-करणं सगुणस्तुतिर्भवति। ये गुणाश्च परमेश्वरे न विद्यन्ते, ततस्तं पृथङ् मत्वा तस्य स्तवनं निर्गुणस्तुतिर्भवति।

अत्र सगुण - स्तुतेः एकं वैदिकमुदाहरणं प्रस्तूयते -

**'यो भूतं च भव्यं च सर्वं यश्चाधितिष्ठति।**
**स्वर्यस्य च केवलं तस्मै ज्येष्ठाय ब्रह्मणे नमः[१५] ॥'**

**अर्थः** -

(यो भूतं च भव्यं च) यः परमेश्वरः, एको भूत-कालो योऽतीतः (च) अनेकप्रकार-वचनादत्र वर्तमानस्य ग्रहणं क्रियते, योऽद्वितीयो वर्तमान-कालः, (भव्यं च) तृतीयश्च भविष्यकालो यो भव्योऽस्ति, एषां त्रयाणां कालानां मध्ये यत्किञ्चित् भवति, तानि सर्वाणि व्यवहाराणि स यथावज्जानाति, (सर्वं यश्चाधितिष्ठति) यश्च समग्रं जगत् स्वविज्ञानेनैव विजानाति, रचयति, पालयति, प्रलयति, संसारस्य च सर्वेषां पदार्थानामधिष्ठाताऽर्थात् स्वामी वर्तते। (स्वर्यस्य च केवलम्) यस्य सुखमेव केवलं स्वरूपमस्ति, यस्य लेशमात्रमपि दुःखं न भवति, यश्च मोक्षस्य व्यवहार-सुखस्य च दाताऽऽनन्दघनश्च वर्तते (तस्मै ज्येष्ठाय ब्रह्मणे नमः) यच्च ज्येष्ठम् = सर्वमहत् सर्वसामर्थ्ययुक्तं ब्रह्म परमात्माऽस्ति, तस्मै अतिप्रेमपूर्वकोऽस्माकं नमस्कारोऽस्तु।

**'स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्। कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः[१६] ॥'**

**अर्थः** -

हे मनुष्याः! यद् ब्रह्म (शुक्रम्) आशुकरं सर्वशक्तिमान् (अकायम्) स्थूलसूक्ष्मकारणशरीर-रहितम् (अव्रणम्) अच्छिद्रमच्छेद्यम् (अस्नाविरम्) नाड्यादिसम्बन्धरहितम् (शुद्धम्) अविद्यादिदोष-रहितत्वं सदा (अपापविद्धम्) यत् पाप-युक्तं पाप-कारि पाप-प्रियं कदाचिन्न भवति, सः (पर्यगात्) सर्वतो व्याप्तोऽस्ति। यः (कविः) सर्वज्ञः (मनीषी) सर्वेषां जीवानां मनोवृत्तीनां वेत्ता (परिभूः) यो दुष्टान् पापिनः परिभवति = तिरस्करोति (स्वयम्भूः) अनादिस्वरूपो यस्य संयोगेनोत्पत्तिर्वियोगेन विनाशः, माता-पितरौ, गर्भवासः, जन्म, वृद्धि-क्षयौ च न विद्यन्ते, सः (शाश्वतीभ्यः) सनातनीभ्योऽनादिस्वरूपाभ्यः स्वस्वरूपेणोत्पत्तिविनाश-रहिताभ्यः (समाभ्यः) प्रजाभ्यः (याथातथ्यतः) यथार्थतया (अर्थान्) वेद-द्वारा सर्वान् पदार्थान् (विदधे) विशेषेण विधत्ते (सः) स परमात्मैव युष्माभिरुपासनीयः।

अस्मिन् मन्त्रे परमेश्वरस्य शुक्रादि-नाम्ना सगुणा स्तुतिः, अकायादि-नाम्ना च निर्गुणा स्तुतिर्वेदितव्या।

---

१५. अथर्ववेदे १०/८/१

१६. यजुर्वेदे ४०/८

www.thearyasamaj.org

२. **प्रार्थना**-

(क) स्वसामर्थ्यस्योपरान्तं परमेश्वरस्य सम्बन्धेन यद् विज्ञानादिकमुपलब्धं भवति, तस्माद् ईश्वराद् याञ्चा-करणं प्रार्थनेति कथ्यते। तस्याः फलं च निरभिमानत्वादिकं भवति।

(ख) स्वस्य पूर्ण-पुरुषार्थस्य पश्चादुत्तर-कर्त्तृणां सिद्धये परमेश्वरस्य कस्यचित् सामर्थ्यवतः पुरुषस्य वा सहायस्योपादानं **प्रार्थने**त्युच्यते।

(ग) अभिमानस्य नाशः, आत्मन्यार्द्रता, गुणानां ग्रहणे पुरुषार्थता, अत्यन्त-प्रीतिभाव-श्चेत्येतानि प्रार्थना-फलानि सन्ति ।

(घ) ईश्वराच्छुभ-गुणानां ग्रहणस्येच्छा **सगुणा प्रार्थना,** दोष - मोचनार्थं च परमेश्वरस्य सहायस्य कामना **निर्गुणा प्रार्थना** कथ्यते।

अत्र सगुण-प्रार्थनाया एकं वैदिकमुदाहरणं प्रस्तूयते-

**'यां मेधां देवगणाः पितरश्चोपासते ।**
**तया मामद्य मेधयाऽग्ने मेधाविनं कुरु स्वाहा[१७] ॥'**

**अर्थः** -

**( यां मेधाम् )** हे परमात्मन्! भवान् निज-कृपया याऽत्यन्तोत्तमा सत्यविद्यादिशुभगुणयुक्ता धारण-योग्या बुद्धिरिति तथा युक्तानस्मान् कुरुतात् । यस्याः प्रतापेन वयं = विद्वांसः, पितरः = ज्ञानिनश्च भूत्वा भवत उपासनां सर्वदा कुर्याम ।

**स्वाहा-शब्दस्यार्थः** -

स्वाहा-शब्दस्य योऽर्थो निरुक्त-कारेण यास्क-मुनिनाऽनेकधा कथितः, सोऽत्र प्रकाश्यते -

(१) सु+आहेति **स्वाहा** । सर्वैर्मनुष्यैरच्छं मिष्टं कल्याणकरं च प्रिय - वचनं सदा वक्तव्यमिति ।

(२) स्वा वागाहेति स्वाहा । सर्वैर्मनुष्यैरिदं निश्चयं ज्ञातव्यं यद् यादृशी वार्ता तेषां ज्ञाने वर्तमाना भवेत्, तादृश्यैव जिह्वया सदा वक्तव्या, न ततो विपरीता।

(३) स्वं प्राहेति **स्वाहा** । सर्वे मनुष्याः स्वकीयमेव पदार्थं स्वकीयं कथयेयुः, द्वितीयस्य पदार्थं तु स्वकीयं न कदापि वदेयुः। अर्थात् ते धर्म-युक्तेन पुरुषार्थेन यावन्तं पदार्थं लभेरंस्तावत्येव ते सदा सन्तोषं कुर्युः ।

(४) स्वाहुतं हविर्जुहोतीति **स्वाहा**। सर्वे मनुष्याः सुगन्धादीनां द्रव्याणां सम्यक्तया संस्कारं विधाय सर्वजगत उपकारकं होमं कुर्युः ।

(५) **स्वाहा** - शब्दस्य चायमप्यर्थो वर्तते, यदस्माभिः सदा मिथ्यावादं विहाय सत्यमेव सदा वक्तव्यमिति दयानन्दः।

(६) वार्थस्याऽऽसमन्तात् हानम् = स्वाहा इति पण्डित-सुदर्शनदेवाचार्यः।

[क्रमशः]

१७. यजुर्वेदे ३२/१४

www.thearyasamaj.org

# * रसगंगाधरे समस्या-पूर्तिः *

–श्री अनन्तशास्त्री पिंगले
डेक्कन कालेज, पूना

भागीरथीभक्तिविभूषितस्वान्ता आलङ्कारिकचूडा-मणित्वेन अद्यापि विराजमना: जगन्नाथपण्डितराजा: रसगङ्गाधराख्यमपूर्वं ग्रन्थम् अपूर्णमेव निर्माय स्वयं स्वर्गमलङ्कृतवन्त इति प्रथिततरमेव समेषाम्। तत्रापि अन्तिम-श्लोकस्य उत्तरालङ्कारेऽन्त्यश्लोकस्य पादत्रयार्थमेव अन्तकेनावकाश: प्रदत्तस्तेभ्य:। अत: स ग्रन्थराज:

**'किं कुर्वते दरिद्राः, का सारवती धरा मनोज्ञतरा ।**
**को पावनस्त्रिलोक्याम्** ............................ ॥'

इति पादत्रयेणैव समाप्तिं प्रायात्। एतच्चोदाहरणं प्रतिपाद्यविषयीभूतोत्तरालङ्का- रस्य विवरणेन स्पष्टीभविष्यति। **'प्रश्नप्रतिबन्धक-ज्ञानविषयीभूतोऽर्थम् उत्तरम्।'** इत्युत्तरालङ्कारं लक्ष्यी-कृत्य विषयी-भूतोत्तरज्ञाने जाते पद्यान्तर्जिज्ञासानिवृत्त्या चमत्कार-प्रत्यायनेन अयमलङ्कारो भवतीति तद्विवरण- सङ्क्षेप:। प्रकार-विवेचनान्ते च व्याख्याम्-**पद्यान्तवर्तिबहिर्वर्तिनोर्द्वयोरप्युत्तरयो**:सकृच्छ्रु-तिपर्यायत्वेन शब्दावृत्तिपर्यायत्वेन अनेकेषां प्रश्नानेक-पदनिवेदितोत्तरत्वेन प्रकारान्तरैश्च बहुप्रभेदत्वम् दिङ्मात्रेणोदाहृतं च निर्दिष्टं पद्यम्।'

तत्र **'किं कुर्वते दरिद्रा:?'** इति प्रश्न:। उत्तरं च पद्य एव दरिद्रा: किं कुर्वते नाम **'किंकरतां भजन्ते'** इति। **सारवती मनोज्ञतरा धरा का?** इति प्रश्न:। **कासारवती**–तडागवतीत्युत्तरम्। **'त्रिलोक्यां पावन: क:, यद्वा अपावन: क:'** इति प्रश्ने च य: कोपं अवति, रक्षति स **कोपावन:**, कोपं दीर्घकालं रक्षन् **'अपावन:'** अथवा कोपं संयच्छश्च **'पावनं'** इत्युत्तर-द्वयम्।

एवं पादोनतया विकलं ग्रन्थराजं सन्धातुं तादृश-योग्यताभावेऽपि सेवा-बुद्ध्या यथामति कृतयत्नोऽयं जन:। समस्यापूर्तिकरणे च उत्तरालङ्कारं साधयित्वा पण्डितराजस्य प्रकृतग्रन्थकर्तुरपि सभाजनं कर्तव्य-मित्यस्ति ममोद्देश:। तदनुसारमुपस्थाप्यतेऽयं चरण:-

**'को ज्ञोऽन्यो राजपण्डितो जयति ।'**

अयं भाव: 'हे पण्डितराज! अन्य: त्वदन्य: क: ज्ञ: विद्वान् राजपण्डित: सर्वोत्कर्षेण वर्तते? इति प्रश्न:। अत्र **'त्वमेव तादृशः पण्डितराज'** इति पद्यबहिर्वर्ति आक्षेपलभ्यमुत्तरम्। अन्यदपि प्रकृता-ङ्लकारसूचकं पद्यान्तर्वर्ति उत्तरमत्र वर्तते। तद्यथा– य: त्वदन्यस्त्वमिव को ज्ञ: नाम कं विष्णुम् उ शम्भुं च जानातीति हरिहरस्वरूपज्ञ: पण्डितश्रेष्ठ: स जयति। यथा चात्र उत्तरालङ्कार-रीत्या यत्र प्रश्न:, तत्रैवोत्तरं कविराजस्तुतिश्च संपद्यते। तेन अलङ्कारपूरणं भवति, रसगङ्गाधरस्य रसगङ्गा चाखण्डिता प्रवहेत्।

एवं च पण्डितराजोत्तरग्रन्थस्थोत्तरालङ्कार-प्रकरणे उत्तरालङ्कार-पूरणेन उत्तर-पद्यं ग्रन्थराजश्च एवमुत्तरितो भवति–

**किं कुर्वते दरिद्रा:, कासारवती धरा मनोज्ञतरा ।**
**को पावनस्त्रिलोक्यां को ज्ञोऽन्यो राजपण्डितो जयति॥**

तेन जगन्नाथ: प्रीयताम् । इति दिक् ।

www.thearyasamaj.org

# * रामायणकाले विविधाः शिक्षा *

-डॉ. हरीशचन्द्रः गुरुरानी
शोध-अधिकारी
उत्तराञ्चल-संस्कृत-अकादमी
हरिद्वारम् (उत्तराखण्डः)

**सत्याचार - विचार - शिक्षणपरा सर्वाङ्गिकीमुन्नतिं,
छात्राणां विदधद् विवेक-विनयाचार-प्रचारैकधीः।
चारित्र्योन्नतिसाधिका गुणगणैः सारल्यसंसाधिका
लोकेषु प्रचरेत् सुशिष्यजनिदा शिक्षा सदा कामधुक्।।**

अखिलेऽस्मिन् ब्रह्माण्डे वैदिककालादध्यावधि समेषां मानवानामाध्यात्मिक-चारित्रिक-बौद्धिक-सामाजिक-विकासमुन्नेतुं प्रकाशमानञ्च कर्तुं प्रभवति शिक्षा। शिक्षा विद्योपादाने इत्यनेन धातुना सिद्ध्यति। शिक्षैका गतिशीला विकासप्रक्रिया वर्तते। यया शिक्षया मानवः मानवत्वं प्राप्नोति। शिक्षा दर्पणमिव कार्यं सम्पादयति, यथा दर्पणमवलोक्य मानवः स्वीयं वास्तविकं स्वरूपं वेत्ति, तथैव शिक्षया मानवः स्वास्तित्त्वबोधं कर्तुं प्रभवति। शिक्षयैवात्मज्ञानं जायते, नान्यथा। स्वास्तित्त्व-बोधमवाप्य महर्षिणा वाल्मीकिना सर्वेषां शिक्षा-दर्शनानां रत्नमिव आदिकाव्यं **रामायणं महाकाव्यं** विरचितम्।

रामायण-प्रणेता आदिकविः वाल्मीकिः लौकिक-भाषायाः शिक्षायाश्च आदिमः कविः मन्यते। यथोक्तं ध्वन्यालोककारेण आनन्दवर्द्धनेन **'शोकः श्लोकत्वमागतः[१]।'** अर्थात् महाकवेः हृदये या दया, करुणा, भावना परिव्याप्तासीत्, सा क्रौञ्चयुगलं दर्शं दर्शं काव्यरूपेण प्रवाहिताऽभूत्। रामायण-महाकाव्यमाश्रित्य महर्षिणा वाल्मीकिना भारतीय-संस्कृतेः, शिक्षायाः, महतादर्शञ्च संस्थापितम्।

वाल्मीकि-रामायणे आध्यात्मिक-चारित्रिक-बौद्धिक-सामाजिक-शिक्षायाश्च पदे-पदे वर्णनं विद्यते। तत्र राम-लक्ष्मण-भरत-हनुमदादिनां पावनं चरित्रं कौशल्या-सीता-अनुसूया-प्रभृतीनां सुरभितं जीवनं विद्यते। रामायणे मानवीय-गुणानां निधिः विद्यते। रामकथनेन सुधीजनानां मानसपटले विविधानि चित्राणि समागच्छन्ति। यथा नरपतिः, आज्ञाकारी पुत्रः, स्नेही भ्राता, सामाजपालकः इत्यादयः। रामायण-काले शिक्षायाः अवधारणा श्रेष्ठपुरुषस्य निर्माणं करणीयतासीत्, येन उत्तम-चरित्रस्य श्रेष्ठ-राष्ट्रस्य च संवर्धनं भवेदिति।

रामायण-काले शिक्षा-दर्शनं रामचरित्रदर्शनञ्च समानरूपेण आसीत्। वाल्मीकिना रामस्य आदर्शं मत्वा रामः शिक्षायाः प्रभावेण दानवीरः, कर्मवीरः, सत्यभाषी, पराक्रमी, विनयशीलश्चाभवत्। यथा–

**शीलवृद्धैर्ज्ञानवृद्धैर्वयोवृद्धैश्च सज्जनैः।
कथयन्नास्त वै नित्यमस्त्रयोग्यान्तरेष्वपि।।
बुद्धिमान् मधुराभाषी पूर्वभाषी प्रियंवदः।
वीर्यवान्न च वीर्येण महत्ता स्वेन विस्मितः[२]।।**

---

१. ध्वन्यालोकः १।५

२. अयोध्याकाण्डम्, १/१२-१३

www.thearyasamaj.org

या शिक्षा ऋषिभिः मुनिभिश्च आदिकालाद् स्वीक्रियते, या शिक्षा मनुनाऽपि उद्गीरिता, या शिक्षा उपनिषद्शिक्षायाः प्रामाणिकतां भजते, सा **शिक्षा** वर्तते सत्यस्याचरणम्, यस्याः सत्यविद्यायाः अनुपालनं रामेणापि मनसा वाचा कर्मणा च कृतम्। कथितमपि -

**सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात् सत्यमप्रियम् ।**
**प्रियञ्च नानृतं ब्रूयादेषः धर्मः सनातनः[3] ॥**

**x x x x x**

**अथ च–**

**'सत्यमेव जयते नानृतं सत्येन पन्थाः विततो देवयानः।**
**येना क्रमन्त्यृषयो ह्याप्तकामा, यत्र तत् सत्यस्य परं निधनम्[4]॥'**

**अन्यच्च -**

**'दद्यान्न प्रतिगृह्णीयात् सत्यं ब्रूयान्न चानृतम् ।**
**अपि जीवितहेतोर्हि रामः सत्यपराक्रमः[5] ॥'**

एवं प्रकारेण रामायण-काले सत्यपरायणस्य, सत्याचरणस्य, सत्यज्ञानस्य, सत्यभाषणस्य च शिक्षा परिव्याप्ता आसीत् । येन वक्तुं शक्यते यत् तस्मिन् काले सम्पूर्णं वातावरणं सत्यमयमासीत् ।

**रामायणकाले प्राथमिकशिक्षा -**

रामायण-काले बालानां प्राथमिक-शिक्षायाः पाठनं गृहे एव भवति स्म । **'मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव।'** इत्यादयः शिक्षाप्रदोपदेशाः गृहे एव मातापितरौ समये-समये ददाति स्म । इमां शिक्षां गृहे एव बालाः गृह्णन्ति स्म । कथितमपि–

**'ते चापि मनुजा व्याघ्रा वैदिकाध्ययने रताः ।**
**पितृशुश्रूषणरता धनुर्वेदे च निष्ठिताः[6] ॥'**

रामादयः चत्त्वारः भ्रातरः पितॄणां शुश्रूषां कुर्वन् गृहे वेदानाम् अध्ययनं, धनुर्वेद-शिक्षायाः अभ्यासं कुर्वन्ति स्म । रामायण-काले प्राथमिक-शिक्षा बालानां कृते **शिक्षा-गृहे** अभ्यास-रूपेण आसीत् । तदनन्तरं तेषां बालकानां कृते ऋषिकुलं गुरुकुलञ्चासीत् । तदानीं शिक्षायाः पाठशाला आश्रमाः अपि भवन्ति स्म । यस्मिन् शुद्धे पर्यावरणे छात्राः पठन्ति स्म ।

**'तं दृष्ट्वा परमप्रीतौ राघवौ पुण्यमाश्रमम् ।**
**ऊचतुस्तं महात्मानं विश्वामित्रमिदं वचः[7] ॥'**

शिक्षा मानवस्य सर्वाङ्गीणं विकासं करोति । शिक्षा मानवस्य विविधान् पक्षान् प्रबलं कृत्वा नूतनान् विषयान् उद्घाटयति । रामायणेऽपि वैदिक-शिक्षायाः लौकिकशिक्षायाश्च सामञ्जस्यं दृग्गोचरी भवति । रामायणस्य अनुशीलनेन लोके प्रचलमानायाः शिक्षायाः दर्शनं भवति । यथा वैदिकशिक्षा, औपनिषद्-शिक्षा, षड्वेदाङ्गानां शिक्षा, धर्मशास्त्रशिक्षा, राजनीतिशास्त्र-शिक्षा, संस्कृतशिक्षा, व्याकरणशिक्षा, अर्थशास्त्रशिक्षा, नैतिकशिक्षा, शस्त्रशिक्षा, प्रबन्धन-शिक्षा, स्त्री-शिक्षा च । किन्तु अत्र मया पूर्वं सर्वार्थसाधकी बलाऽतिबला-विद्ययोः विवेचनं क्रियते ।

वस्तुतः पराविद्यायाः मूलभूतोद्देश्यमासीत्–

**'सा विद्या या विमुक्तये'** ।

विद्या तादृशी भवेत्, यया मुक्तिं प्रापयेत् ।

३. मनुस्मृतिः ४/१३८
४. मुण्डकोपनिषद् १/६
५. सुन्दरकाण्डम् ३३/२५
६. बालकाण्डम् १८/३६
७. बालकाण्डम् २३/७

www.thearyasamaj.org

अत्र विश्वामित्रेण बलाऽतिबला-विद्ययो: अभ्यास: कारित: । यदा राम-लक्ष्मणौ विश्वामित्रेण सह गच्छत: स्म, तदा मार्गे रामलक्ष्मणाभ्यां एतयो: विद्ययो: ज्ञानं प्रदत्तम् । उभयो: विद्ययो: अभ्यासेन सम्पूर्णज्ञानं प्राप्य, यश: चतुर्षु दिक्षु प्रसरति, भूतले तस्य समानं कश्चिदपि न तिष्ठति, सर्वार्थसाधिका विद्या रामायणकाले आसीत् । यस्या: विद्याया: प्रभावेण रामेण सर्वं साधितम् -

**मन्त्रग्रामं गृहाण त्वं बलामतिबलां तथा ।**
**न श्रमो न ज्वरो वाते न रूपस्य विपर्यय:[८] ॥**
**न सौभाग्ये न दाक्षिण्ये न ज्ञाने बुद्धिनिश्चये ।**
**नोत्तरे प्रतिवक्तव्ये समो लोके तवानघ[९] ॥**
**बला चातिबला चैव सर्वज्ञानस्य मातरौ[१०] ।**
**विद्याद्वयमधीयाने यशश्चाथ भवेद् भुवि ।**
**पितामह - सुते ह्येते विद्ये तेज: समन्विते[११] ॥**

## वैदिकशिक्षा -

रामायण-काले शिक्षा पूर्णरूपेण वेदसम्मत-मासीत्, यतोहि वैदिक-शिक्षानन्तरं लौकिकशिक्षाया: आदिकाव्यं रामायणमेव । एतदर्थं तत्र वेदसम्मतादर्शानां विनिमयो दृश्यते ।

**बभूव भूयो भूतानां स्वयम्भूरिव सम्मत: ।**
**सर्वे वेदविद: शूरा: सर्वलोकहिते रता:[१२] ॥**

वेदानधीत्य सर्वे वेदज्ञा: लोक-कल्याणाय कटिबद्धा: आसन् । वैदिकीं संस्कृतिं रक्षितुं, ज्ञानस्य प्रकाशाय, राष्ट्रस्य विकासाय च वेदाध्ययनं नूनमेव करणीयम्।

## षड्वेदाङ्गानां शिक्षा -

रामायण-काले जना: वेदज्ञा: आसन् । तस्मिन् काले सर्वेषां कृते शिक्षा आसीत् । रामस्य प्रजायां शिक्षा-ग्रहणार्थं जनानां सौविध्यमासीत्। तत्र केवलं वेदस्य शिक्षा वेदस्य पठनमनिवार्यं नासीदपितु यस्य यादृशीं शिक्षां पठितुमिच्छा भवति स्म, स: तादृशीं शिक्षां पठति स्म । वैदिक-काले ब्रह्मलोकमवाप्तुं षड्वेदाङ्गानां शिक्षामधीयते स्म। वैदिक-काले ब्रह्मलोकमवाप्तुं षड्-वेदाङ्गानां शिक्षामधीयते स्म जनै:। यथा-

**छन्द: पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते[१३] ॥**

रामायण-कालेऽपि एतेषां षड्वेदाङ्गानां पण्डिता: ब्रह्म-लोकं प्राप्तुमासन् । महाराजदशरथस्य अश्वमेध-यज्ञे समागम्यमाना: ब्राह्मणा: पण्डिता: आसन् । अत: वक्तुं शक्यते यत् रामायण-काले षड्वेदाङ्गानां अध्यायनाध्यापनं भवति स्म ।

**नाषडङ्गविदत्रासीन्नाव्रतो नाबहुश्रुत: ।**
**सदस्यास्तस्य वै राज्ञो नावाद कुशलो द्विज:[१४] ॥**

## व्याकरणशिक्षा -

षड्वेदाङ्गेषु व्याकरणस्य महत्त्वपूर्णं स्थानं वर्तते- **'मुखं व्याकरणं स्मृतम्।'**

रामायण-काले सर्वे जना: व्याकरणमपि पठन्ति स्म। रामायण-काले वानरराजसुग्रीवस्य सचिव:

---

८. बालकाण्डम् २२/१३
९. बालकाण्डम् २२/१६
१०. बालकाण्डम् २२/१७
११. बालकाण्डम् २२/१९
१२. बालकाण्डम् १८/२५
१३. पाणिनीयशिक्षा ४१/४२
१४. बालकाण्डम् १४/२१

www.thearyasamaj.org

कपिपतिः हनूमान् लक्ष्मणेन सह संस्कृत-भाषायां वार्तां कृतवान् । वार्ता-समये यत्र कुत्राऽपि दोषं कृतवान्, तदा रामेणोक्तं यत् हनुमता व्याकरण-शास्त्रस्य उत्तमरीत्या स्वाध्यायः कृतः।

'नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् ।
बहु व्याहरतानेन न किञ्चिदपशब्दितम्[१५] ॥'

**धर्मशास्त्रस्य शिक्षा -**

ऋषिभिः मुनिभिः मनीषिभिश्च धर्मस्य व्याख्या बहुधा कृता वर्तते । मनुना धर्मस्य दशलक्षणानि प्रतिपादितानि सन्ति । रामायणे मातापित्रोः वाक्यमेव **'धर्मः'** इति मन्यते । तत्र श्रेष्ठानाम् आज्ञापालनमेव **धर्मः** स्वीक्रियते । कथितमपि-

**'संश्रुत्य च पितुर्वाक्यं मातुर्वा ब्राह्मणस्य वा ।
न कर्त्तव्यं वृथा वीर धर्ममाश्रित्य तिष्ठता[१६] ॥'**

पितुराज्ञया रामः चतुर्दशवर्षाणि यावत् वनवासमङ्गीकृतवान् । राम-सदृशं पितुः आज्ञापालनस्य आदर्शत्त्वं सम्पूर्णे ब्रह्माण्डे कुत्रापि प्राप्तुं न शक्यते । रामायणे पितुः आज्ञायाः पालनं सर्वैरेव कृतम् । सगरस्य पुत्राः खननं कृत्वा ते मृत्युङ्गताः, जमदग्नेः पुत्रः परशुरामः पितुः आज्ञां पालयित्वा मातुः रेणुकायाः शिरः छेदनं कृतवान् ।

नास्ति शक्तिः पितुर्वाक्यं समतिक्रमितुं मम ।
प्रसादये त्वां शिरसा गन्तुमिच्छाम्यहं वनम्[१७] ॥

**राजनीतिशास्त्रस्य शिक्षा -**

यां शिक्षामवाप्य राजानः नीतियुक्तं कार्यं कृत्वा जनानां संरक्षणं संवर्द्धनञ्च कुर्वन्ति, राज्ये विद्यमानाः जनाः कथं सुखिनः स्युः । तत्र दशरथेन रामं प्रति राजनीतेः गुणाः प्रकटिताः । प्रजायाः संवर्धनार्थं विनयशीलः पुरुष एव सम्मानितः भवति । नीतौ अपि सूक्तिरस्ति-

'विद्या ददाति विनयम्।'

**अथ च-**

**'गुणवत्यपि तु स्नेहात् पुत्र वक्ष्यामि ते हितम् ।
भूयो विनयमास्थाय भव नित्यं जितेन्द्रियः[१८] ॥'**

**शस्त्रविद्या -**

सत्वः रजः तमश्च सर्वेषां क्रियान्वयनाय शस्त्रविद्यायाः अभ्यासमपि क्रियते स्म । किन्तु शस्त्रविद्यायाः मर्मज्ञाः विनयाः आसन्, तत्र ऋत्विजाः अपि शस्त्रविद्यायाः पारङ्गताः आसन् -

**'विद्या विनीता ह्रीमन्तः कुशलाः नियतेन्द्रियाः ।
श्रीमन्तश्च महात्मानः शस्त्रज्ञा दृढविक्रमाः[१९] ॥'**

**अर्थशास्त्रशिक्षा -**

रामायण-काले अर्थशास्त्रस्य पण्डिताः आसन्। येन रामराज्ये यशः प्रकाशमानमासीत् । महाराज-दशरथस्य राज्ये अष्टौ मन्त्रिणः अर्थशास्त्रस्य पण्डिताः विद्यमानाः आसन् । ये समये-समये अयोध्यायाः अर्थ-व्यवस्थां दृढी कुर्वन्ति स्म । केनापि कविना कथितमपि -

**धृष्टिर्जयन्तो विजयः सुराष्ट्रो राष्ट्रवर्धनः ।
अकोपो धर्मपालश्च सुमन्त्रश्चाष्टमोऽर्थवित्[२०] ॥**

**वास्तुशास्त्रस्य शिक्षा -**

रामायण-काले वास्तुशास्त्रकाराः आसन् । ये उत्तमानां भवनानां यज्ञशालानां प्रासादानाञ्च निर्माणं कर्तुं सक्षमाः आसन् । आधुनिके काले शिक्षेयं

---

१५. किष्किन्धाकाण्डम् २१/३०
१६. अयोध्याकाण्डम् २१/४२
१७. अयोध्याकाण्डम् २१/३०
१८. बालकाण्डम्
१९. बालकाण्डम् ७/६
२०. बालकाण्डम् ७/३

www.thearyasamaj.org

बहूपयोगी मन्यते ।

**'कर्मान्तिकाञ्शिल्पकारान् वर्धकीन् खनकानपि ।**
**गणकाञ्शिल्पिनश्चैव तथैव नटनर्तकान्[२१] ।।'**

**संस्कृत-शिक्षा -**

सर्वासां भाषाणां जननी संस्कृत-भाषा वैदिककालादारभ्य सर्वान् मानवान् संस्कारयुक्तं कृत्वा तेषा मार्गदर्शनं करोति संस्कृतभाषा । या भाषा खलु गीर्वाणवाणी, गीः, श्रुतिः नाम्नाऽभिधीयते । सरसा सुबोधा विश्व-मनोज्ञेयं भाषा सर्वेषु कालेषु जनैः भाष्यते । रामायण-कालेऽपि हनुमता उक्तम् यत् भाषेयं मानवोचिता भाषा अस्ति । तत्र संस्कृत-भाषायाः स्थाने वाणी-शब्दस्य प्रयोगः दृश्यते। अवलोकनीयं यथा-

**अहं ह्यतितनुश्चैव वानरश्च विशेषतः ।**
**वाचं चोदाहरिष्यामि मानुषीमिह संस्कृताम् ।।**
**यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् ।**
**रावणं मन्यमानां मां सीता भीता भविष्यति[२२] ।।**

**स्त्रीशिक्षा -**

भारतीय-संस्कृतौ: नारी एव स्वसर्जनात्मक-प्रतिभया कलया च मनुष्यं पूर्णममृतत्त्व-प्रदानं करोति। स्त्री केवलं पत्युः सहधर्मिणी नास्ति, अपितु परिवारस्य नियन्त्रिका, संरक्षिका चास्ति । यथा वैदिककाले स्त्रियः उपनयन-संस्कारं कुर्वन्ति, मन्त्रान् पठन्ति, सन्ध्या-वन्दनञ्च कुर्वन्ति, तथैव रामायण-कालेऽपि स्त्रियः सन्ध्यां मन्त्रोच्चारणं च कुर्वन्तिस्म । रामायणे कौशल्या सीता माण्डवी अनुसूयादयः व्यावहारिक-धार्मिक-सामाजिक-कार्येषु भागं गृह्णन्ति स्म ।

यदा रामः वनं प्रति गच्छन्नासीत्, तदा रामः कौशल्यां कथयति यत् शोकः न कर्त्तव्यः। यदि पुत्रः श्रेष्ठमाज्ञापालनं च करोति तदा किमर्थं शोकः? तस्मिन् समये कौशल्या आचमनं कृत्वा यात्राकालिक-मङ्गलगीतानि गायति-

**सा विनीय तमायासमुपस्पृश्य जलं शुचिः ।**
**चकार माता रामस्य मङ्गलानि मनस्विनी[२३] ।।**

तत्रैव सीता-सन्ध्या-वन्दनस्य उपासनायाश्च प्रसङ्गोऽपि समुपलभ्यते ।

**'सन्ध्याकालमनाः श्यामा ध्रुवमेष्यति जानकी ।**
**नदीं चेमां शुभं जलं संध्यार्थे वरवर्णिनी[२४] ।।'**

रामायण-काले स्त्रियः पूर्णरूपेण शिक्षिताः आसन् । येन उत्तम-गृहस्थस्य परिवारस्य बालकेषु उत्तमगुणानां दर्शनं भवति ।

आनन्द-रामायणेऽपि स्त्रियः पूर्णरूपेण शिक्षिताः आसन् । ताभ्यः व्यावहारिक-जीवनोपयोगी-धार्मिक-क्रियाज्ञानं, राजकीय-प्रशासनस्य, शस्त्रचालनस्य, शिक्षा प्रदीयते स्म । नारीणां कृते ललित-कलाः, चित्रकलाः, सङ्गीत-कलानां च शिक्षा[२५] विशेषरूपेण आसीत्।

**प्रबन्धनशिक्षा -**

प्राचीनकालादारभ्य सञ्चाल्यमाना प्रबन्धन-शिक्षा ऋषिभिः प्रतिपादितासीत् । ऋग्वेदे उष्णस्य उत्साहस्य अग्रगमनस्य च शिक्षां

२१. बालकाण्डम् १३/७
२२. बालकाण्डम् ३०/१७-१८
२३. अयोध्याकाण्डम् २९/१
२४. सुन्दरकाण्डम् १४/४९
२५. आनन्दरामायणम् (विवाहकाण्डम्) ५/२९

www.thearyasamaj.org

प्रददाति–

अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजं ।
होतारं रत्न धातमम्[26] ॥

तथैव प्रबन्धन-कार्यस्य शिक्षाऽपि वेदे रामायणे चापि विशिष्टा वर्तते। यतो हि प्रबन्धकः भवति, सः स्वल्पे समये अधिकं कार्यं सम्पादयति । उत्तम-रीत्या रामायणेऽपि समुद्रलंघन-समये मैनाक- पर्वतः सागरं प्रेरयति । सागरः हनूमान विश्रामस्य प्रबन्धनं झटिति करोति–

'साहाय्यं वानरेन्द्रस्य यदि नाहं हनूमतः ।
करिष्यामि भविष्यामि सर्ववाच्यो विवक्षताम्[27] ॥'

एवं प्रकारेण प्रबन्धन-शिक्षायाः श्रेष्ठमुदाहरणं समुपलभ्यते । यत्र तत्र इतस्ततः व्यर्थमेव अटन्तः वानराः रामेण सह कार्ये योजिताः । यैः वानरैः विशाल-सेतोः निर्माणं कृतम् ।

रामायणस्य विहङ्गावलोकनेन ज्ञायते यत् रामायणे विविधाः शिक्षाः विद्यमाना आसन् । न केवलं विद्यमानैव, अपितु तासु शिक्षासु धर्मसंस्कृति-सत्य-सदाचार-नीति-कर्त्तव्य-मर्यादा-कुशलतादिनां गुणानाम् आचरणमपि आसीत् ।

वर्तमान-काले या शिक्षा युवभिः अधीयते सा शिक्षा वैज्ञानिकतां तु जनयति, किन्तु न जनयति संस्कारान्, निज-कर्त्तव्यान् च । वैज्ञानिकी शिक्षा सामर्थ्यानुसारं विज्ञानं प्रबोधयितुं शक्नोति, किन्तु श्रेष्ठ-मानव-निर्माणं कर्तुं न क्षमा । अतः अस्मिन् सङ्कटापन्ने समये रामायण-कालिकी शिक्षा-दर्शनमेव समेषां मानवानां मार्गदर्शनं कर्तुं शक्नोति इत्यहं मन्ये ।

[ 'आन्विक्षिकी' पत्रिकातः साभारम् ]

---

२६. ऋग्वेदः १/१/१
२७. सुन्दरकाण्डम् १/८५

# * एतावान् विलम्बः *

-डॉ. प्रशस्यमित्रः शास्त्री
बी-२९ जेल रोड (आनन्दनगरम्)
रायबरेली (उ.प्र.)

कस्यचिद् विशालस्य वास्तु-भाण्डागारस्य स्वामी स्वकीयस्य भाण्डागार-सुरक्षा-बीमां कारितवान् । परन्तु दुर्भाग्यवशाद् संयोगाद् वा यस्मिन्नेव दिवसे तस्य भाण्डागारस्य बीमाकरणं संवृत्तं, तस्मिन्नेव दिवसे मध्याह्नकाले भाण्डागारः महता अग्नि-काण्डेन भस्मीभूतः, तत्र विद्यमानानि सर्वाणि वस्तून्यपि भस्मसात् अभूवन् ।

अग्निकाण्डस्य सूचना-समकालमेव यथाशीघ्रं बीमा-कार्यालय उच्चाधिकारिणस्तत् सर्वं निरीक्षितुं तत्र आगतवन्तः । बीमा-कार्यालयेन शङ्का प्रकटिता यत् मन्ये केनाऽपि सर्वं पूर्वाऽपरं विचार्य बीमाधन-प्राप्त्यर्थमेव, अग्निकाण्डमेतत् आयोजितं स्यात्, अथवा वस्तुतः दुःखयोगादेव सर्वमेतत् सम्पन्नम् ? एवं बहुविचारितेऽपि तत्र नैतत् तथाविधं किमपि प्रमाणितं यत् अग्निकाण्डमेतत् सुविज्ञाय सम्पन्नं कृतं स्यात् । अतः बीमा-कार्यालयेन भाण्डागार-स्वामिनम् एकं पत्रं प्रेषितं, तत्र चेदं लिखितम् आसीत् ।

'महोदय ! भवदीय-भाण्डागारस्य बीमाकृत्यं प्रातः १०.३० वादने सुसम्पन्नमासीत्, परन्तु अग्नि-काण्डमेतत् मध्याह्ने द्विवादने सञ्जातम् । किं भवान् एतत् स्पष्टीकर्तुं शक्नोति यद् अत्र एतावतो विलम्बस्य कारणं किं वर्तते ? ।'

www.thearyasamaj.org



# * साम्प्रतं तन्न साम्प्रतम् *

–वैद्य श्रीरामस्वरूपशास्त्री

(१)
प्रशास्ति भारतेऽस्माकं, गणतन्त्रं स्वतन्त्रताम् ।
तथापि पीडिता लोकाः साम्प्रतं तन्न साम्प्रतम् ॥

(२)
आङ्गली वर्धते शिक्षा, तैजी नश्यन्ति संस्कृतिः ।
धर्मे न वर्तते स्थैर्यं, साम्प्रतं तन्न साम्प्रतम् ॥

(३)
मुद्राया हीयते मूल्यं, वस्तूना तद्विवर्धते ।
महर्घो याति चाकाशं, साम्प्रतं तन्न साम्प्रतम् ॥

(४)
अन्नं वस्त्रं गुडं तैलं, नेन्धनं चापि लभ्यते ।
नगरेषु निवासाय, न गृहं तन्न साम्प्रतम् ॥

(५)
गेहे बन्धो न स्वीयेषु नास्ति शालासुशासनम् ।
नास्ति लोकेषु विश्वासो लोकानां तन्न साम्प्रतम्॥

(६)
कार्यार्थाः स्वामिनः सन्ति, सेवकाश्च धनार्थिनः।
लोके नीतिभयं नास्ति, साम्प्रतं तन्न साम्प्रतम् ॥

(७)
प्रभवः सन्ति लुण्ठाकाः, साधवः सन्ति पीडिताः।
नीतिभ्रष्टाश्च नेतारः, साम्प्रतं तन्न साम्प्रतम् ॥

(८)
छात्रेषु विनयो नास्ति, विश्वासो न सुतेष्वपि।
पितरौ नापि चादर्शौ, साम्प्रतं तन्न साम्प्रतम् ॥

हरिद्वार-स्थितस्य ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य मुखपत्रम्
भारतोदयः ( संस्कृत - मासिकम् )
P.O. गुरुकुलमहाविद्यालयः २४९४०४
हरिद्वारम् ( उत्तराखण्डः )
सेवायाम्, श्री

(९)
दीना हीना मलीनाश्च, कार्यचौरा दिने दिने।
ग्रामीणा नगरं यान्ति, साम्प्रतं तन्न साम्प्रतम् ॥

(१०)
स्वतन्त्राः साक्षरा नार्यः, कार्याय विचरन्ति याः।
कार्यालयेषु भृत्याय, साम्प्रतं तन्न साम्प्रतम् ॥

(११)
पण्डिता खण्डिताः सर्वे, संस्कृतं समुपेक्षितम्।
संस्कृतिः मन्दतां याति, साम्प्रतं तन्न साम्प्रतम् ॥

मुद्रकेण, प्रकाशकेन डॉ. हरिगोपालशास्त्रिणा ज्वालापुर-स्थिते 'न्यू जे.एन. स्टेशनरी मार्ट' नामके मुद्रणालये मुद्रापयित्वा 'भारतोदयः' मासिकं पत्रं प्राकाश्यं नीतं हरिद्वार - स्थितया ज्वालापुरीय-गुरुकुलमहाविद्यालय - सभया ।
सम्पादकः डॉ. हरिगोपालशास्त्री